श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# श्रीमद्वाल्मीकीयरामायणम्

## ॥ सुन्दरकाण्डम् ॥

## त्रिचत्वारिंशः सर्गः

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः
श्रीसीतारामाभ्यां नमः
श्रीमते रामानुजाय नमः

# ॥ सुन्दरकाण्डम् ॥

## त्रिचत्वारिंशः सर्गः

*हनुमता चैत्यप्रासादस्य विध्वंसस्तद्रक्षकाणां वधश्च*

ततः स किङ्करान् हत्वा हनूमान् ध्यानमास्थितः।
वनं भग्नं मया चैत्यप्रासादो न विनाशितः॥ ५.४३.१ ॥

तस्मात् प्रासादमद्यैवमिमं विध्वंसयाम्यहम्।
इति सञ्चिन्त्य हनुमान् मनसादर्शयन् बलम्॥ ५.४३.२ ॥

चैत्यप्रासादमुत्प्लुत्य मेरुशृङ्गमिवोन्नतम्।
आरुरोह हरिश्रेष्ठो हनूमान् मारुतात्मजः॥ ५.४३.३ ॥

आरुह्य गिरिसङ्काशं प्रासादं हरियूथपः।
बभौ स सुमहातेजाः प्रतिसूर्य इवोदितः॥ ५.४३.४ ॥

सम्प्रधृष्य च दुर्धर्षश्चैत्यप्रासादमुन्नतम्।
हनूमान् प्रज्वलँल्लक्ष्म्या पारियात्रोपमोऽभवत्॥ ५.४३.५ ॥

स भूत्वा सुमहाकायः प्रभावान् मारुतात्मजः।
धृष्टमास्फोटयामास लङ्कां शब्देन पूरयन्॥ ५.४३.६ ॥

तस्यास्फोटितशब्देन महता श्रोत्रघातिना।
पेतुर्विहङ्गमास्तत्र चैत्यपालाश्च मोहिताः॥ ५.४३.७ ॥

अस्त्रविज्जयतां रामो लक्ष्मणश्च महाबलः।
राजा जयति सुग्रीवो राघवेणाभिपालितः॥ ५.४३.८ ॥

दासोऽहं कोसलेन्द्रस्य रामस्याक्लिष्टकर्मणः।
हनूमान् शत्रुसैन्यानां निहन्ता मारुतात्मजः॥ ५.४३.९ ॥

www.prapatti.com

न रावणसहस्रं मे युद्धे प्रतिबलं भवेत्।
शिलाभिश्च प्रहरतः पादपैश्च सहस्रशः॥ ५.४३.१० ॥

धर्षयित्वा पुरीं लङ्कामभिवाद्य च मैथिलीम्।
समृद्धार्थो गमिष्यामि मिषतां सर्वरक्षसाम्॥ ५.४३.११ ॥

एमुक्त्वा महाकायश्चैत्यस्थो हरियूथपः।
ननाद भीमनिर्ह्रादो रक्षसां जनयन् भयम्॥ ५.४३.१२ ॥

तेन नादेन महता चैत्यपालाः शतं ययुः।
गृहीत्वा विविधानस्त्रान् प्रासान् खड्गान् परश्वधान्॥ ५.४३.१३ ॥

विसृजन्तो महाकाया मारुतिं पर्यवारयन्।
ते गदाभिर्विचित्राभिः परिघैः काञ्चनाङ्गदैः॥ ५.४३.१४ ॥

आजग्मुर्वानरश्रेष्ठं बाणैश्चादित्यसन्निभैः।
आवर्त इव गङ्गायास्तोयस्य विपुलो महान्॥ ५.४३.१५ ॥

परिक्षिप्य हरिश्रेष्ठं स बभौ रक्षसां गणः।
ततो वातात्मजः क्रुद्धो भीमरूपं समास्थितः॥ ५.४३.१६ ॥

प्रासादस्य महांस्तस्य स्तम्भं हेमपरिष्कृतम्।
उत्पाटयित्वा वेगेन हनूमान् मारुतात्मजः॥ ५.४३.१७ ॥

ततस्तं भ्रामयामास शताधारं महाबलः।
तत्र चाग्निः समभवत् प्रासादश्चाप्यदह्यत॥ ५.४३.१८ ॥

दह्यमानं ततो दृष्ट्वा प्रासादं हरियूथपः।
स राक्षसशतं हत्वा वज्रेणेन्द्र इवासुरान्॥ ५.४३.१९ ॥

अन्तरिक्षस्थितः श्रीमानिदं वचनमब्रवीत्।
मादृशानां सहस्राणि विसृष्टानि महात्मनाम्॥ ५.४३.२० ॥

बलिनां वानरेन्द्राणां सुग्रीववशवर्तिनाम्।
अटन्ति वसुधां कृत्स्नां वयमन्ये च वानराः॥ ५.४३.२१ ॥

दशनागबलाः केचित् केचिद् दशगुणोत्तराः।
केचिन्नागसहस्रस्य बभूवुस्तुल्यविक्रमाः॥ ५.४३.२२॥

सन्ति चौघबलाः केचित् सन्ति वायुबलोपमाः।
अप्रमेयबलाः केचित् तत्रासन् हरियूथपाः॥ ५.४३.२३॥

ईदृग्विधैस्तु हरिभिर्वृतो दन्तनखायुधैः।
शतैः शतसहस्रैश्च कोटिभिश्चायुतैरपि॥ ५.४३.२४॥

आगमिष्यति सुग्रीवः सर्वेषां वो निषूदनः।
नेयमस्ति पुरी लङ्का न यूयं न च रावणः।
यस्य त्विक्ष्वाकुवीरेण बद्धं वैरं महात्मना॥ ५.४३.२५॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे त्रिचत्वारिंशः सर्गः॥



www.prapatti.com